National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(66): 187-191
© 2026 NJHSR
www.sanskritarticle.com

**सुकान्त कुमार बारिक**
शोधच्छात्रः , व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**सुकान्त कुमार बारिक**
शोधच्छात्रः , व्याकरणविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भारतीयज्ञानपरम्परायां पुरा नारीणामद्भूता भूमिका

**सुकान्त कुमार बारिक**

**सारांशः -**

भारतीयज्ञानपरम्परायां नार्यः अत्यन्तं गौरवपूर्णं महत्त्वपूर्णं स्थानं च भजते। अत्र नारी न केवलं गृहिणी, अपितु 'शक्ति' स्वरूपा, 'ब्रह्मवादिनी' च मन्यते। भारतीयज्ञानपरम्परायां नारी न केवलं पुरुषस्य 'अर्धाङ्गिनी' अस्ति, अपि तु सा शक्तिः, विद्या, धृतिः च अस्ति। सामाजिकावश्यकतानुसारं कालक्रमेण केचन विकाराः आगताः स्युः, परन्तु आध्यात्मिक-बौद्धिकदृष्ट्या भारतीयपरम्परायां नारी सर्वदा ज्ञानस्य उत्सः मन्यते। भारतीयचिन्तने नारी ‘शक्तिः’ उच्यते। यथा-

क्रियाशक्तिःविना शक्तिं (नारीतत्त्वं) ज्ञानं (पुरुषतत्त्वं) जडं भवति। संसारे यापि प्रगतिः दृश्यते, तस्याः पृष्ठतः नारीणां धैर्यं, त्यागः, प्रेरणामयी शक्तिः च वर्तते। सन्तुलनं सा गृहे समाजे च प्रेम-सहिष्णुता-धैर्याणां सन्तुलनं स्थापयति।

**कूटशब्दाः** - सांस्कृतिक-नैतिक-मूल्यानां संरक्षिका नारी,आचार्या,ब्रह्मवादिनीनां परम्परा ,स्मृतिग्रन्थेषु ‘मातृपदस्य’ सर्वोच्चता, जननी जन्मभूमिश्च स्वर्गादपि गरीयसी , वेदेषु नारीणामधिकारश्चेत्यादयः ।

## 1. उपक्रमः -

संसारे मानवीयमूल्यानां (Human Values) रक्षा नारीभिः एव कृता अस्ति। अहिंसा दया च नारीषु स्वाभाविकी करुणा भवति।एषा करुणा एव संसारं युद्धेभ्यः विनाशाय च दूरे स्थापयति। सा शान्तेः सौहार्दस्य च दूती अस्ति। नारी कस्यापि समाजस्य ‘मेरुदण्डः’ (Backbone) अस्ति। सा यदा ब्रह्मवादिनी भवति तदा ज्ञानं ददाति, यदा गृहिणी भवति तदा समाजं निर्माति, यदा च वीराङ्गना भवति तदा राष्ट्रं रक्षति। संसारे नार्याः उपयोगिता ‘सूर्यस्य प्रकाशः’ इव अस्ति, यं विना सर्वं अन्धकारमयं भविष्यति। अतः एव उक्तम्— “नारी अस्य समाजस्य आधारशिला अस्ति।अस्माकं संस्काराः, कथाः, लोकगीतानि च नारीभिः एव जीवन्तः रक्षिताः। ‘पुराण’ कथानां वाचनं श्रावणं च गृहेषु नारीभिः एव क्रियते, येन भारतीयज्ञानं पिढीं प्रति (generation to generation) प्रवहति। संक्षेपेण वक्तुं शक्यते यत् –

भारतीयपरम्परायां नारी ‘शक्ति’ स्वरूपा अस्ति। सा यदा ज्ञानं ददाति तदा सरस्वती, यदा राष्ट्रं रक्षति तदा दुर्गा, यदा च पोषणं करोति तदा अन्नपूर्णा भवति। अतः ज्ञानपरम्परायाः सा अविभाज्या अङ्गम् अस्ति। भारतीयज्ञानपरम्परायां नारीणां स्थानं न केवलं सामाजिकं वा व्यावहारिकं, अपितु तात्त्विकं आध्यात्मिकं च अस्ति। अत्र केचन विशिष्टाः पक्षाः सन्ति ।

## 2. नारीणां स्थानस्य मुख्यविशेषाः

धर्मशास्त्रेषु नारी ‘अर्धाङ्गिनी’ इति उच्यते। तस्याः विना कोऽपि धार्मिकविधिः पूर्णः न मन्यते। अत एव सा ‘धर्मपत्नी’ इति कथ्यते। निष्कर्षतः, भारतीयज्ञानपरम्परा नारीं केवलं भोगवस्तु न मत्वा ‘प्रज्ञा’ तथा ‘करुणा’ इत्यनयोः संगमं मन्यते। सा समाजस्य निर्मात्री, संस्कृतेः रक्षिका च अस्ति। भारतीयज्ञानपरम्परायां नारीणां स्थानं बहुआयामिकम् अस्ति। संसारस्य विकासे नारीणां आर्थिकं सामाजिकं च योगदानमतुलनीयमस्ति। श्रमशक्तिः कृषिक्षेत्रादारभ्य अन्तरिक्षविज्ञानपर्यन्तं नार्यः

स्वकौशलेनसंसारस्य अर्थव्यवस्थां सुदृढां कुर्वन्ति। प्रबन्धनम् (Management): गृहाणां प्रबन्धनं यत् 'सूक्ष्म-अर्थव्यवस्था' (Micro-economics) उच्यते, तत्र नारीणां निर्णयशक्तिः अतीव प्रखरा भवति। नारीं विना संसारस्य कल्पना एव असम्भवा। सा 'प्रकृतिः' अस्ति। यथा बीजं भूमौ उस्वा एव अङ्कुरितं भवति, तथैव संसारस्य नैरन्तर्यं नार्या एव भवति। जैविकमहत्त्वं सा न केवलं जन्म ददाति, अपि तु स्वशरीरेण जीवस्य रक्षणं पोषणं च करोति। अतः सा 'जननी' रूपेण सृष्टेः मूलस्तम्भः अस्ति । पूर्वोक्तबिन्दूनां अतिरिक्तं अन्येषु क्षेत्रेषु अपि तासां प्रभावः स्पष्टः दृश्यते।

### 3.प्रथमा आचार्या (The First Educator)

कथ्यते यत् "एका माता शतं शिक्षकेभ्यः श्रेष्ठा।" संसारे ज्ञानस्य संस्कारस्य च प्रसारः नार्या एव आरभ्यते। संस्कारसिञ्चनं बालस्य प्रथमं शिक्षणं मातुः अङ्के एव भवति। भाषा, व्यवहारः, नैतिकता च सा एव पाठयति। यदि नारी शिक्षिता प्रबुद्धा च भवति, तर्हि सम्पूर्णः समाज उन्नतमुहूर्तं प्रति गच्छति।

### 4.'अर्धाङ्गिनी' इत्यस्य दार्शनिकः अर्थः

भारतीयपरम्परायां पुरुषः नारी च परस्परं पूरकौ मन्येते। 'अर्धनारीश्वर' इति अवधारणा अस्य श्रेष्ठं उदाहरणम् अस्ति। तन्त्रशास्त्रे दर्शने च उक्तं यत्—

शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्। अर्थात् शक्तिं (नारीतत्त्वं) विना शिवः (ज्ञानतत्त्वम्) अपि कार्यं कर्तुं न शक्नोति। अतः ज्ञानस्य प्रकटीकरणाय नारीशक्तिः अनिवार्या अस्ति।

### 5.ब्रह्मवादिनीनां परम्परा

प्राचीनभारते द्विविधाः स्त्रियः आसन्। ब्रह्मवादिन्यो या आजीवनं वेदाध्ययनम्, शास्त्रार्थम्, ब्रह्मजिज्ञासाञ्च कुर्वन्ति स्म (यथा- गार्गी, सुलभा)। सद्योवधूः: याः विवाहपर्यन्तं शिक्षां प्राप्य ततः परं गृहस्थाश्रमस्य दायित्वं निर्वहन्ति स्म। एषा व्यवस्था दर्शयति यत् ज्ञानमार्गे नारीणां कृते कश्चन प्रतिबन्धः नासीत्।

### 6.महाकाव्येषु प्रज्ञावती नारी

रामायणे महाभारते च अनेकानि उदाहरणानि सन्ति यत्र नार्यः पुरुषान् धर्मोपदेशं दत्तवत्यः। मन्दोदरी-तारा: एते पात्रे स्वपतिभ्यः नीतिशास्त्रस्य राजनीतिशास्त्रस्य च बोधं दत्तवत्यः। महाभारते यदा पाण्डवाः वनवासे आसन्, तदा द्रौपदी युधिष्ठिरेण सह 'क्षमा' तथा पुरुषार्थ -विषये गम्भीरं शास्त्रार्थं कृतवती, यत् तस्याः प्रखरपाण्डित्यं सूचयति।

### 7.कलासु 'षोडशकला' नैपुण्यम्

भारतीय-सौन्दर्यशास्त्रे नारीणां सम्बन्धः 'ललितकलाभिः' सह गाढः अस्ति। कामशास्त्रे उक्ताः ६४ कलाः (चतुःषष्टिकलाः) प्रायः नारीभिः एव संवर्धिताः। एतासु कलासु नृत्यम्, सङ्गीतम्, चित्रकला, पाककला, उद्यानकला, वास्तुविद्या चान्तर्भवन्ति। एतज्ज्ञानादृते भारतीयसंस्कृतिरपूर्णास्ति।

### 8.स्मृतिग्रन्थेषु 'मातृपदस्य' सर्वोच्चता

यद्यपि केचन स्मृतिकाराः कठोरनियमं दत्तवन्तः, तथापि तेऽपि मातृपदं सर्वश्रेष्ठं मन्यन्ते । उच्यते –

उपाध्यायान् दशाचार्य आचार्याणां शतं पिता।
सहस्रं तु पितृन् माता गौरवेणातिरिच्यते॥

अर्थात् दश उपाध्यायेभ्यः एकः आचार्यः श्रेष्ठः, शतं आचार्येभ्यः पिता श्रेष्ठः, परन्तु सहस्रं पितृभ्यः माता श्रेष्ठा गौरवास्पदा च भवति। व्याकरणशास्त्रस्य दृष्ट्या नारीणां स्थानं अत्यन्तं सुदृढं प्रमाणसिद्धं च अस्ति। अष्टाध्यायी-महाभाष्यादिषु ग्रन्थेषु अङ्किताः केचन शब्दाः प्रयोगाश्च तस्मिन् काले नारीणां शैक्षिकस्तरं गौरवञ्च प्रमाणीकुर्वन्ति। 'आचार्या' इति शब्दस्य सिद्धिः

पाणिनिप्रणीतायाम् अष्टाध्याय्याम् 'आचार्यादणश्च' (४.१.४९) इति सूत्रस्य व्याख्यायां वार्तिककारेण कात्यायनेन तथा महाभाष्यकारेण पतञ्जलिना स्पष्टं कृतं यत् –

आचार्याणी आचार्यस्य पत्नी (Teacher's wife)।

आचार्या या स्वयं व्याख्यात्री, वेदमन्त्राणां अध्यापिका च भवति।(A woman who is herself a teacher/preceptor)

प्रमाणम् "स्वयं व्याख्यात्री आचार्या" (महाभाष्यम्)। एषः प्रयोगः सिद्धं करोति यत् व्याकरणदृष्ट्या नार्यः केवलं भार्यात्वेन न, अपितु स्वतन्त्र-शिक्षिकारूपेण अपि परिगणिताः आसन्।

'उपाध्याया' इत्यस्य प्रयोगः अमरकोशे तथा व्याकरणग्रन्थेषु 'उपाध्याया' इति शब्दः अपि तासां कृते प्रयुक्तः उपाध्याया: "स्वयं या पाठयति सा उपाध्याया।"एषः शब्दः केवलं सम्मानार्थः नासीत्, अपितु तस्याः वृत्तिं (Profession) सूचयति स्म। 'काठिका' तथा 'बह्वृची' शब्दाः ।महाभाष्ये श्रीमत्पतञ्जलिना काश्चन विशिष्टाः संज्ञाः प्रयुक्ताः, याः नारीणां विशिष्टशास्त्रेषु निपुणतां दर्शयन्ति । काठिका: या नारी कठ-शाखायाः (कृष्णयजुर्वेदस्य) वेदाध्ययनं पाठयति स्म। बह्वृची ऋग्वेदस्य ज्ञात्री नारी। औपिका विशिष्टां व्याकरणप्रक्रियां ज्ञात्री। यद्यपि परवर्तिकालखण्डेषु काश्चन विसंगतयः आगताः, तथापि मनुस्मृतौ नारीणां सम्मानार्थं प्रसिद्धः श्लोकः अस्ति–

यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः।
यत्रैतास्तु न पूज्यन्ते सर्वास्तत्राफलाः क्रियाः॥

अर्थात् यत्र नारीणां पूजा (सम्मानः) भवति, तत्रैव देवशक्तिः निवसति।

### 9.वैदिकयुगे नारीणामधिकारः

वैदिककाले नारीणां स्थितिः अत्युत्तमा आसीत्। तासामुपनयन-संस्कारः भवति स्म, ताः वेदाध्ययनं च कुर्वन्ति स्म। ब्रह्मवादिन्यः: याः आजन्मं ब्रह्मविद्यायाः चर्चां कुर्वन्ति स्म। यथा— गार्गी, मैत्रेयी, लोपामुद्रा, घोषा च। सद्योवध्वः याः विवाहपर्यन्तं शिक्षां प्राप्नुवन्ति स्म। ऋषिका: ऋग्वेदे अनेकाः ऋचः सन्ति यासां दर्शनं ऋषिभिः सह ऋषिकाभिः (नारीभिः) अपि कृतम्। दृश्यते उपनिषत्सु नारीणां उच्चकोट्याः बौद्धिकस्तरः। गार्गीयाज्ञवल्क्य-संवादः बृहदारण्यकोप-निषदि विदुषी गार्गी राजर्षेः जनकस्य सभायां याज्ञवल्क्येन सह शास्त्रार्थं कृतवती। एषः संवादः नारीणां तार्किकक्षमतायाः परिचायिकास्ति। मैत्रेयी सा भौतिकसम्पदः अपेक्षया आत्मज्ञानं

(अमृतत्वम्) श्रेष्ठं मन्यते स्म। व्याकरणशास्त्रस्य संस्कारप्रक्रियासु अपि नारीणां स्थानम् अस्ति। पुराकल्पे कुमारीणां मौञ्जीबन्धनं (उपनयनं) विहितम् आसीत्।

**"पुराकल्पे कुमारीणां मौञ्जीबन्धनमिष्यते।**

**अध्यापनं च वेदानां सावित्रीवचनं तथा॥"**

(यमस्मृतिः, यस्याः उद्धरणं व्याकरणभाष्यप्रसङ्गेषु दृश्यते)।

व्याकरणं 'वेदानां मुखम्' उच्यते। यदि नार्यः वेदाध्ययनं कुर्वन्ति स्म, तर्हि तासां व्याकरणे अधिकारः स्वतः सिद्धः एव।

**10.व्याकरण-साहित्य-कलासु सूक्ष्मदृष्टिः**

अमरकोशे अपि 'उपाध्याया' तथा 'उपाध्यायानी' इति शब्दद्वयस्य भेदः कृतः अस्ति। उपाध्याया: सा नारी या स्वयं पाठयति (स्वयं शिक्षिका)। आचार्या: या स्वयं वेदमन्त्राणां व्याख्यां कर्तुं समर्था अस्ति। एते शब्दाः सिद्धं कुर्वन्ति यत् प्राचीनकाले नारीणां कृते पृथक् शैक्षणिकपदानि आसन्। भारतीयकाव्यशास्त्रे दर्शने च नारीणां महत्तत्त्वं स्वीकृतम्। शक्तिपूजा: भारतीयपरम्परायां विद्यायाः अधिष्ठात्री देवी सरस्वती, धनस्य लक्ष्मी तथा शक्तेः दुर्गा अस्ति। एतेन ज्ञायते यत् ज्ञान-अर्थ-शक्ति-क्षेत्रेषु नारी एव मूलभूता आधारशिला अस्ति।कवयित्र्य: गङ्गादेवी, तिरुमलाम्बासदृशाः कवयित्र्यः संस्कृतसाहित्यं समृद्धं कृतवत्यः।

**11.न्याय- वेदान्त-शास्त्रेषु उल्लेखः**

जैमिनिः स्वस्य 'पूर्वमीमांसा' सूत्रेषु स्पष्टं कृतवान् यत्—

**"स्ववतोस्तु वचनादैककर्म्यं स्यात्"** (६.१.१७) । अस्य अर्थः अस्ति यत् यज्ञकर्मणि फलाधिकारिणौ दम्पती समानरूपेण भवतः। यदि नारी अज्ञाना भवेत्, तर्हि सा यज्ञे भागं ग्रहीतुं न शक्नोति। अतः श्रुतिपरम्परायां तस्याः शिक्षा अनिवार्या मन्यते स्म। केवलं उपनिषत्काले एव न, अपितूत्तरवर्तिनि काले अपि नार्यः गम्भीरदार्शनिकचर्चासु निपुणाः आसन्। उभयभारती: आदिगुरु-शङ्कराचार्यस्य मण्डनमिश्रस्य च मध्ये यः सुप्रसिद्धः शास्त्रार्थः अभवत्, तत्र उभयभारती (मण्डनमिश्रस्य पत्नी) मध्यस्थत्वेन (न्यायधीशतया) नियुक्ता आसीत्। एतद् दर्शयति यत् तस्मिन् काले नारीणां तार्किकयोग्यतायां समाजस्य पूर्णः विश्वासः आसीत्। जैमिनिसूत्रेषु नारीणां यज्ञे अधिकारविषये गम्भीरा चर्चा अस्ति। समानोऽधिकारः: मीमांसकाः वदन्ति यत् पति-पत्नी द्वौ अपि 'दम्पती' रूपेण एकं फलं प्राप्नुतः। यदि नारी शास्त्रज्ञानरहिता भवेत्, तर्हि सा यज्ञस्य मन्त्रान् विधीन् च ज्ञातुं न शक्नुयात्। अतः तस्याः 'अध्ययनाधिकारः' व्याकरण-मीमांसा-शास्त्रैः समर्थितः अस्ति। न्यायशास्त्रं तर्कप्रधानं भवति। अत्रापि विदुष्यः नारीणां नामानि आदरपूर्वकं गृह्यन्ते। सुलभा-जनक-संवादः: महाभारते सुलभा नाम्नी संन्यासिनी राजा जनकस्य सभां गत्वा तं 'ज्ञान' विषये पराजितं कृतवती। तस्याः तर्कशक्तिः न्यायशास्त्रस्य उत्तमोदाहरणम् अस्ति। मीमांसायां 'अधिकारिविचारः': मीमांसादर्शने 'अधिकारः' नामकः कश्चन भागः अस्ति, यत्र स्पष्टं कृतं यत् स्त्रियः अपि पुरुषवत् 'स्वामिनी' भवितुं शक्नुवन्ति, सम्पत्तौ च तासां समानः अधिकारः वर्तते।

**12.राजधर्मः प्रशासनं च**

भारतीयपरम्परायां नार्यः केवलं ज्ञानक्षेत्रे न, अपितु प्रशासन-नीतिशास्त्रयोः अपि महतीं भूमिकां निर्व्यूढवत्यः। कौटिल्यस्य अर्थशास्त्रे: महिलानां गुप्तचररूपेण, अङ्गरक्षरूपेण च नियुक्तिः वर्णिता अस्ति। राज्ञीनां शासनम्: प्रभावतीगुप्ता, नायिका देवी, रानी दुर्गावती इत्यादयः नार्यः न केवलं राज्यं पालितवत्यः, अपितु युद्धकौशले अपि स्वपाण्डित्यं प्रदर्शितवत्यः। नार्यः केवलं गृहे न, अपितु 'मन्त्रणा' (Consultation) कार्ये अपि श्रेष्ठाः आसन् । विदुला-पुत्र-संवादः महाभारते विदुला स्वपुत्रं प्रति यं 'राजधर्मं' बोधयति, तत् नीतिशास्त्रस्य सारभूतं तत्त्वम् अस्ति। कौटिल्यनीतिः: चाणक्येन अपि नारीणां बुद्धेः उपयागः राज्यरक्षायै कृतः।

13.आयुर्वेदशास्त्रे नारीणामधिकारः

आयुर्वेदपरम्परायां नारीणां महती भूमिका वर्तते। प्राचीनग्रन्थेषु तासां कृते 'भिषक्' (वैद्यः) इति सम्बोधनं अपि प्राप्यते। प्रसूतिविद्या (Obstetrics): चर्क-सुश्रुतसंहितयोः प्रसूतिप्रसङ्गे विदुषीणां वृद्धानां च महिलानां विशेषः उल्लेखः अस्ति। ताः 'शस्त्रकर्मणि' (Surgical procedures) अपि निपुणाः आसन्। बालतन्त्रम् (Paediatrics): शिशुनां पोषणं, रक्षा, औषधयोजना च नारीणां सहजसिद्धं ज्ञानम् आसीत्। भैषज्यकल्पना: ओषधिनां निर्माणे, पाकविधिषु च नारीणां सूक्ष्मदृष्टिः आयुर्वेदस्य संरक्षणे सहायिका अभवत्। भारतीयज्ञान-परम्परायां 'चिकित्सा' क्षेत्रे अपि नारीणां विशेषं योगदानम् आसीत्। कौमारभृत्यं शिशुपालनं तथा प्रसूतिविद्यायां तासां विशेषं नैपुण्यम् आसीत्।वनौषधिज्ञानङ्ग्रामीणपरम्परासु नार्यः पारम्परिकचिकित्सा-पद्धतीनां मुख्यसंरक्षिकाः आसन्।

14. **लिङ्गानुशासनस्य सूक्ष्मचिन्तनम्**

पाणिनीयव्याकरणे **'पुंयोगादाख्यायाम्'** (४.१.४८) इति सूत्रं नारीणां पुरुषसापेक्षं स्थानं वर्णयति, परन्तु 'शक्ति' तथा 'देवता' वाचकाः शब्दाः (यथा- उमा, लक्ष्मी, सरस्वती) व्याकरणदृष्ट्या अपि पूज्याः सन्ति। व्याकरणशास्त्रं स्त्रीलिङ्गशब्दान् अपि तादृश्या एव सूक्ष्मतायाः सिद्ध्यति यादृश्या पुल्लिङ्गशब्दान्।व्याकरणशास्त्रं शब्दैः सह व्यवहारं करोति। तत्र 'आचार्या', 'उपाध्याया', 'काठिका' इत्यादीनां शब्दानां सत्ता एव अस्मिन् विषये परमं प्रमाणं यत् भारतीयज्ञानपरम्परायां नार्यः ज्ञानस्य अधिकारिण्यः, प्रसारिकाः, संरक्षिकाः च आसन्। व्याकरणं तासां बौद्धिकसामर्थ्यस्य कृते पूर्णं स्थानं ददाति। भारतीयज्ञानपरम्परायां नारीणां स्थानं विवेचयितुं व्याकरणशास्त्रात् परं न्याय-मीमांसा-तन्त्र-लोकपरम्परासु अपि अनेकानि प्रबलानि प्रमाणानि उपलभ्यन्ते।

**१. शास्त्रार्थे निर्णायकत्वम् (The Role of Judge)**

२. भारतीयपरम्परायां नारी केवलं शिष्या वा अध्यापिका नासीत्, अपितु सा महतां विदुषां शास्त्रार्थे 'निर्णायिका' अपि आसीत्।

मण्डनमिश्र-शङ्कराचार्य-संवादः: यदा जगद्गुरुशङ्कराचार्यस्य मण्डनमिश्रेण सह शास्त्रार्थः अभवत्, तदा मण्डनमिश्रस्य पत्नी उभयभारती (शारदा) एव न्यायधीशतया नियुक्ता आसीत्। प्रमाणम् अत्र एतद् प्रमाणं यत् तस्याः ज्ञानं शास्त्रमर्यादा च तावती उच्चा आसीत् यत् तस्याः निर्णयं शङ्कराचार्यसदृशाः महापुरुषाः अपि शिरोधार्यं कृतवन्तः।

**15.तन्त्रशास्त्रे 'शक्ति' विमर्शः**

तन्त्रपरम्परायां तु नारी एव ज्ञानस्य मूलमुच्यते। तत्र 'गुरुः' पुरुषः अपि भवितुं शक्नोति नारी अपि। योगिनीकुलतन्त्रेऽनेकासां 'योगिनिनाम् ' वर्णनं वर्तते, याः मोक्षदात्रीः ज्ञानदात्रीः च मन्यन्ते। तन्त्रसिद्धान्तः: "**स्त्रियः देवाः स्त्रियः प्राणाः स्त्रिय एव विभूषणम्।** अर्थात् स्त्रियः एव देवाः, प्राणाः, विभूषणं च सन्ति। अत्र ज्ञानस्य क्रियाशक्तिः नारीरूपेण एव कल्पिता।

**16.सांख्यदर्शने 'प्रकृतिः'**

सांख्यदर्शने जगत् 'पुरुष-प्रकृति' योः संयोगात् जायते। अत्र 'प्रकृतिः' (नारीतत्त्वं) क्रियाशीला अस्ति। ज्ञानस्य प्रसवः प्रकृत्या एव भवति। अत्र प्रकृतिः जडा न, अपितु सृष्टेः निर्मात्री अस्ति।

**17.गणित-ज्योतिषशास्त्रयोः स्थानम्**

भारते गणितं ज्योतिषं च 'वेदाङ्गम्' मन्यते। अत्रापि नारीणां प्रज्ञा प्रखरत्वेन दृश्यते। लीलावती खगोलविद् भास्कराचार्यः स्वपुत्रीं 'लीलावतीं' सम्बोध्य एव गणितस्य कठिणतमान् प्रश्नान् पृच्छति स्म। एतद् दर्शयति यत् तस्मिन् युगे बालिका उच्चस्तरीयगणितविद्यायां प्रवीणा आसन्। खगोलविद्या: अनेकराजवंशेषु राज्ञ्यः मुहूर्त्तानां ग्रहनक्षत्राणाञ्च ज्ञानं धारयन्ति स्म, यस्य साहाय्येन ताः राजकार्याणि कुर्वन्ति स्म।

**18.गान्धर्ववेदे (सङ्गीत-नृत्यशास्त्रे)**

सङ्गीतं नृत्यं च भारतीयपरम्परायाः अविभाज्यमङ्गमस्ति। अत्र नारीणां स्थानं 'देवी' सदृशं वर्तते। भरतनाट्यशास्त्रमाचार्य-भरतेनाप्सरसां निर्माणं कृतं येन नाट्यवेदस्य पूर्णता अभवत्। अत्र नारीणां 'अभिनय' क्षमता तथा 'ताल' ज्ञानं सर्वोपरी मन्यते। साधनारूपेण सङ्गीतम्: मीराबाई सदृशाः साधिकाः सङ्गीतेन एव परमात्मनः साक्षात्कारं कृतवत्यः, यत् एकं श्रेष्ठं आध्यात्मिकं ज्ञानमस्ति।

**19.शिल्प-वास्तु-कलासु योगदानम्**

मन्दिराणां निर्माणे, मूर्तिकलायां च नारीणां सौन्दर्यदृष्टिः ज्ञानञ्च प्रतिबिम्बितं भवति। राणी की वाव (गुजरात): रानी उदयमत्या निर्मिता एषा वापी (Stepwell) वास्तुशास्त्रस्य अद्भुतं प्रमाणम् अस्ति। मन्दिराणां निर्माणञ्चालुक्यवंशस्य होयसलवंशस्य च राज्ञ्यः (यथा- शान्तला देवी) स्वयं वास्तुशास्त्रविदुष्यः आसन्, तासाम् निरीक्षणे एव विशालमन्दिराणां निर्माणं जातम्।

**20. समाजाय प्रमुखनारीणामवदानम् –**

**(क) ऋषिका लोपामुद्रा (वैदिकज्ञानम्)**

लोपामुद्रा ऋग्वेदस्य ऋषिका आसीत्। सा महर्षेः अगस्त्यस्य पत्नी आसीत्। योगदानम् ऋग्वेदस्य प्रथमे मण्डले तावत्पर्यन्तं १७९ तमं सूक्तं लोपामुद्रया दृष्टम् (मन्त्रद्रष्ट्री)। सा 'श्रीविद्या' सम्प्रदायस्य प्रवर्त्तिका अपि मन्यते। तस्याः दर्शनेन सिद्धं भवति यत् नार्यः गम्भीरं आध्यात्मिकं तपः कर्तुं समर्थाः आसन्।

**(ख)सुलभा (दार्शनिकं ज्ञानम्)**

महाभारतस्य शान्तिपर्वणि सुलभायाः उल्लेखः अस्ति। सा एका परमहंसा संन्यासिनी आसीत्। योगदानं सा राजा जनकस्य सभायां गत्वा तस्य 'आत्मज्ञानस्य' परीक्षां गृहीतवती। सा अन्वय-व्यतिरेक-युक्तिभिः राजा जनकं बोधयति स्म यत् आत्मा शरीरात् भिन्नः अस्ति। तस्याः संवादः तार्किकदृष्ट्या अत्युच्चकोट्याः अस्ति।

**(ग)लीलावती (गणित-खगोलशास्त्रम्),नारीणां कृते प्रेरणा**

लीलावती द्वादशशताब्द्याः महान् गणितज्ञस्य भास्कराचार्यस्य पुत्री आसीत्। सा अत्यन्तं बुद्धिमती आसीत्। किंवदन्ती अस्ति यत् तस्याः विवाहे कश्चन विघ्नः आसीत्, अतः तां सान्त्वयितुं ज्ञानमार्गे च प्रवृत्तां कर्तुं भास्कराचार्यः गणितस्य एतं ग्रन्थं रचितवान्, तस्य नाम च स्वपुत्र्याः नाम्ना 'लीलावती' इति अकरोत्। भास्कराचार्यस्य पुत्री लीलावती स्वकाले महान् गणितज्ञा आसीत्। योगदानं यदा अस्माकं देशे पाश्चात्यज्ञानस्य प्रभावः नासीत्, तदा लीलावती बीजगणितस्य, अङ्कगणितस्य च कठिणप्रश्नान् लीलया समाधानं करोति स्म। भास्कराचार्यः 'लीलावती' ग्रन्थे पृच्छति—

**"बाले लीलावति! प्रोच्यतां यदि जानासि..."**एतेन सिद्धं भवति यत् गणितसदृशेषु विषयेषु अपि नारीणां स्थानं अग्रगण्यम् आसीत्। लीलावत्याः प्रसङ्गः सिद्धं करोति यत् –

शिक्षायाः अधिकारः: मध्यकाले अपि कन्यानां कृते गणित-ज्योतिषसदृशाः कठिणाः विषयाः पाठ्यन्ते स्म। पितुः भूमिका: भास्कराचार्यसदृशाः विद्वांसः स्वपुत्रीणां बौद्धिकविकासे विशेषं ध्यानं ददति स्म। अमरत्वम् अद्य ८०० वर्षेभ्यः परम् अपि कस्याश्चित् नार्या नाम्ना गणितस्य ग्रन्थः विश्वप्रसिद्धः अस्ति, एतत् नारीशक्तेः विजयः अस्ति। लीलावती केवलं एका व्यक्तिः नासीत्।

**१. ग्रन्थस्य वैशिष्ट्यम्**

'लीलावती' ग्रन्थः भास्कराचार्यस्य 'सिद्धान्तशिरोमणिः' इति विशालग्रन्थस्य प्रथमः भागः अस्ति। अस्य ग्रन्थस्य शैली अत्यन्ता मधुरा सरला च अस्ति। अत्र गणितस्य कठिनाः प्रश्नाः अपि काव्यरूपेण पृष्टाः सन्ति। लीलावती-ग्रन्थे वर्णिताः विषयाः -

अस्मिन् ग्रन्थे गणितस्य एते विषयाः सन्ति, येषु लीलावती निपुणा आसीत् । परिकर्माष्टकम् सङ्कलन-व्यवकलन-गुणन-भागादयः। वर्ग-घनमूलादयः Square and Cube roots.

त्रैराशिकम् Rule of Three.

क्षेत्रगणितम् Geometry (क्षेत्रफल-घनफलादि)।

छायागणितम् Shadow calculation (Trigonometry इत्यस्य आरम्भः)।

कुट्टक-गणितम् Algebra (इतरविषयाणां समाधानम्)।

**1.एकमुदाहरणम् (काव्यरूपेण गणितम्)**

लीलावती-ग्रन्थे एकः प्रसिद्धः प्रश्नः अस्ति "अलिगुलदलं सप्तमांशोऽब्जमध्ये..." अस्मिन् प्रश्ने भ्रमराणां सङ्ख्यां ज्ञातुं पृष्टम् अस्ति। अत्र गणितं केवलं शुष्कं न भूत्वा 'साहित्यमयं' जातम्। लीलावती एतादृशान् जटिलप्रश्नान् मुखाग्रं समाधानं करोति स्म। सा भारतीयस्त्रीणां तार्किक्याः प्रज्ञायाः प्रतीकम् अस्ति।

**(घ) अक्कमहादेवी तथा मीराबाई (भक्ति-दर्शनम्)**

भक्तिकाले नारीभिः दर्शनस्य सरलप्रवाहः जनसामान्येषु प्रसारितः। अक्कमहादेवी (कर्णाटक): सा कन्नडभाषायां 'वचन' साहितस्य रचनां कृतवती। तस्याः दार्शनिकं चिन्तनं शिव-शक्ति-ऐक्ये आधारितं वर्तते। मीराबाई (राजस्थान): मीरायाः पदेषु वेदान्तस्य, विशेषतः मधुरा-भक्तेः पराकाष्ठा दृश्यते। सा तस्मिन् काले सामाजिकबन्धनानि छित्त्वा ज्ञानमार्गे अग्रे गता।

**(ङ) विज्जिका / विजयाङ्का (संस्कृतसाहित्यम्)**

कर्णाटकस्य चालुक्यवंशस्य एषा विदुषी संस्कृतकाव्यपरम्परायां श्रेष्ठा मन्यते। प्रमाणम् - राजशेखरः स्वकीये ग्रन्थे 'काव्यमीमांसायां' लिखति—

"सरस्वतीव कार्ष्णेन विज्जिका सा विजायते।"

अर्थात् नीलोत्पलदलश्यामा विज्जिका साक्षात् सरस्वती इव आसीत्। सा दण्डिनः अपि समकालिकी श्रेष्ठा कवयित्री आसीत्। अत्र कासाञ्चन विशिष्टानामृषिकाणां विदुषीणां च वर्णनं दीयते, यासां योगदानेन भारतीयज्ञानपरम्परा अद्यापि दैदीप्यमाना वर्तते ।

**उपसंहारः**

भारतीयपरम्परायां नारीणां स्थानं केवलम् 'उपयोगितावादि' (Functional) नासीत्, अपि तु 'तात्त्विकम्' (Ontological) आसीत्। सा ज्ञानस्य स्रोता, संरक्षिका, निर्णयात्री च अवर्तत , वर्तते, वर्तिष्यते चापि ।

**सहायकग्रन्थसूची**

1.अमरकोशः - अमरसिहः, चौखम्वासंस्कृतसंस्थानम्, वाराणसी – 2001.

2.ऋग्वेदसंहिता - श्रीअरविन्दोकपाली शास्त्री इन्स्टिट्युट् अफ् वेदिक कल्चर, वेङ्गालुरु ।

3.काव्यप्रकाशः-आचार्यम्मटः,भारतीयविद्याप्रकाशन्, दिल्ली, 1993.

4.संस्कृत साहित्य का इतिहास – हरेकृष्ण शथपथि, बलदेव उपाध्याय

5. वैदिक साहित्य और संस्कृति – कपिलदेव द्विवेदी